"अबध्याञ्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपि" ति० त० ।

**तिल** गतौ भ्वा०पर०सक०सेट् । तेलति अतेलीत् । तितेल ।

**तिल** स्नेहे तु० पर० अक० अनिट् । तिलति अतेलीत् । तितेल । [ तिलत् त ।

**तिल** स्नेहे चुरा० उभ० अक० सेट् । तेलयति ते अती-

**तिल** पु०तिल—क । स्वनामख्याते शस्यभेदे । भावप्र०तद्गुणाद्युक्तं यथा "तिलः कृष्णः सितो रक्तः सवर्णोऽल्पतिलः स्मृतः । तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः । विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत् । बल्यः केश्यो हिमस्पर्शस्त्वच्यस्तन्योव्रणे हितः । दन्त्योऽल्पमूत्रकृद्ग्राही वातघ्नोऽग्निमतिप्रदः । कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः । अन्ये हीनतराः प्रोक्तास्तज्ज्ञै रक्तादयस्तिलाः" ।

तिलप्रतिग्रहनिषेधमाह ब्रह्मपुराणम् "ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतस्तथा । अव्यसमपि मातङ्गतिललौहांश्च वर्जयेत्" तिलदाने फलमाह विष्णुः । "तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्" । महाभारते "कल्यमुत्थाय यो विप्रः स्नातः शुक्लेन वाससा । तिलपात्रं प्रयच्छन् वै सर्वपापैः प्रमुच्यते" । शु० त० स्मृतिः "प्रेतमुद्दिश्य यो दद्यात् हेमगर्भांस्तिलान्नृप ! । यावन्तस्ते तिलाः स्वर्गे तावत्कालं स मोदते" । सप्तम्यादिवर्ज्जं तिलैः सदा स्नानं कर्त्तव्यमाह मार्कण्डेयः "सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः । श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः । सप्तमीं नवमीं चैव पर्वकालञ्च वर्जयेत्" जन्मतिथौ तिलनिष्पाद्याः षड्व्यापाराः कार्य्याः यथाह ति० त० "तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः । तिलभुक् तिलवापी च षट् तिली नावसीदति" कालविशेषे तिलतर्पणनिषेधः गङ्गादौ च सर्वदा निषिद्धदिनेऽपि तिलतर्पणकार्य्यता च तर्पणशब्दे ३२५८ पृ० उक्ता । रात्रौ तिलसंबद्धवस्तुमात्रस्याभक्ष्यता "सर्वञ्च तिलसंबद्धं नाद्यादस्तमिते रवौ" काशी० "तिलास्त्वम्भकसंश्लेषात् प्राप्नुवन्त्यधिवासताम्" कामन्दकी० "विक्रीणाति तिलैस्तिलान्" पञ्चत० । २तिलतुल्ये स्वल्पप्रमाणे च "तिलं तिलं समादाय रत्नानां यद्विनिर्मिता । तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः" भा० आ० ७९९६ श्लो० । ३तिलाकारे देहस्थे (तिल) ख्याते तिलकालके च "देवगुरुप्रसादेन जिह्वाग्रे मे सरस्वती । तेनाहं नृप ! जानामि भानुमत्यास्तिलं यथा" कालिदासः । तिलस्य विकारः अण् । तैल तिलनिर्यासे तिलस्नेहे तिलसदृशवस्तुजाते स्नेहे च "अदुष्टं सार्षपं तैलं यत्तैलं पुष्पवासितम् । अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यशः" तिथित० । पर्वणि तन्निषेधमाह "स्त्रीतैलमांससंभोगी विण्मूत्रनरकं व्रजेत्" ति०त० एवमन्यदिनेऽपि तैलनिषेधः स्मृतौ दृश्यः ।

**तिलक** न० तिल—क्वुन् तिल+इवार्थे स्वल्पे वा कन् वा । १क्लोमनि २कृष्णसौवर्चले अमरः ३सौवर्चले मेदि० । ४तिलवृक्षे, पु० राजनि० । ५अश्वभेदे, पुंस्त्री० मेदि० । ६रोगभेदे, अमरः । ७मरुवके च हेमच० । स्वनामख्याते नासादौ धार्य्ये ८चन्दनादिविशेषके पुंन० । तस्य धारणप्रकारो यथा "द्वादशाङ्गे ललाटादौ तिलकं हरिमन्दिरम् । स्नानान्ते वैष्णवः कुर्य्यात् प्रत्येकं कृष्णनामभिः । वामे वक्षसि नेत्रान्ते गरुडेऽसे शङ्खचिह्नितम् । तथैव दक्षिणे कुर्य्याद्धरेश्चक्राङ्कितं मुने ! । ललाटे केशवं विद्यात् कण्ठे श्रीपुरुषोत्तमम् । वामबाहौ वासुदेवं सव्ये दामोदरन्तथा । नाभौ नारायणञ्चैव माधवं हृदये तथा । गोविन्दं दक्षिणे पार्श्वे वामे चैव त्रिविक्रमम् । विष्णुं सव्ये कर्णमूले दक्षिणे मधुसूदनम् । शिरोमध्ये हृषीकेशं पद्मनाभञ्च पृष्ठतः । हरेर्द्वादशनामानि पठित्वा तिलकानि तु । यः कुर्य्याद्वैष्णवो नित्यं स प्रेमभक्तिमाप्नुयात् । ये कण्ठलग्नतुलसीभवकाष्ठमाला ये द्वादशाङ्गहरिनामकृतोर्द्ध्वपुण्ड्राः । ये कृष्णभक्तिसुदृढा धृतशङ्खचक्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति । तिलकन्तूर्द्ध्वपुण्ड्राख्यं मध्यच्छिद्रं हि नारद ! । यदि कुर्य्याल्ललाटे तद्विज्ञेयं हरिमन्दिरम् । आनासामूलमाश्रित्य शिरोमध्यगतं मुने ! । हरिपादाकृतं नासामूलमारभ्य यत्नतः । हरिमन्दिरवत् सर्वं तद्राधावल्लभीयकम् । श्रीराधावल्लभीयं यत्तिलकं सुमनोहरम् । यौगलं तत्तु विज्ञेयं यदि मध्यसुरञ्जितम् । यदूर्द्ध्वपुण्ड्रं तिलकं शोभनं तन्मनोहरम् । तन्मध्ये पीतरेखञ्च श्रीमद्रामानुजं विदुः । श्रीरामोपासना यस्य तिलकं तदूर्द्ध्वपुण्ड्रकम् । भ्रुवोर्म्मध्ये सबिन्दु स्याद् यदि विप्र ! मनोहरम् । हरेः सर्वावताराणां मत्स्यादीनां विशेषतः । उपासकानां तिलकं केवलं हरिमन्दिरम् । ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियाणां तथैव च । वैश्यानान्तु तथा विप्र ! शूद्रादेर्मण्डलाकृति । अच्छिद्रमूर्द्ध्वपुण्ड्रन्तु ये कुर्वन्ति जनाधमाः । तेषां ललाटे सततं